# श्रीसोमनाथसंस्कृतयुनिवर्सिटी, वेरावलम्

## सत्रान्तपरीक्षा – डिसेम्बर – २०१८

**कक्षा** – आचार्याद्वितीयवर्षम् (SEM-3) **प्रश्नपत्रम्** – ३ **गुणा:** - ७०

**विषय:** - स्वामिनारायणवेदान्त: (जे.) **कोड** – **CC 5.3.8. (NEW)** **समय:** - १० त: ०१

**दिनाङ्क:** - ०६/१२/२०१८ **सन्दर्भग्रन्थ:** – कठोपनिषद्

---

**प्रथमान्विति: (Unit-1)**

**प्रश्नः – १ कस्यचिदेकस्य ससन्दर्भव्याख्या कार्या।** ५x१=०५

(१) शान्तसंकल्प: सुमना यथा स्याद्वीतमन्युर्गौतमोमां मृत्यो।
त्वत्प्रसृष्टं माभिवदेत्प्रतीत एतत्त्रयाणां प्रथमं वरं वृणे॥

(२) हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम्।
उभौ तौ विजानीतौ नायं हन्ति न हन्यते॥

**प्रश्नः – २ कस्यचिदेकस्य सविस्तरमुत्तरं देयम्।** १०x१=१०

(१) कठोपनिषद: शान्तिमन्त्रं विलिख्य यथाभाष्यं व्याख्यायत

(२) कठोपनिषद: द्वितीयवल्ल्या: सारतत्त्वं लेख्यम्।

**द्वितीयान्विति: (Unit-2)**

**प्रश्नः – ३ कस्यचिदेकस्य ससन्दर्भव्याख्या कार्या।** ५x१=०५

१. आत्मानं रथिनं विद्धि शरीरं रथमेव तु
बुद्धिं तु सारथिं विद्धि मनःप्रग्रहमेव च॥

२. नाचिकेतमुपाख्यानं मृत्युप्रोक्तं सनातनम्
उक्त्वा श्रुत्वा च मेधावी ब्रह्मलोके महीयते॥

**प्रश्नः – ४ कस्यचिदेकस्य प्रश्नस्योत्तरं लेख्यम् ।** १०x१=१०

(१) ऋतं पिबन्तौ सुकृतस्य..... इति मन्त्रं प्रपूर्य भाष्यदिशा व्याख्यायत।

(२) कठोपनिषद: तृतीयवल्लया: सारभागम् उपपादयत।

**तृतीयान्विति:(Unit - 3)**

**प्रश्नः – ५ कस्यचिद् एकस्य मन्त्रस्य ससन्दर्भं व्याख्या कार्या।** ५x१=०५

(१) य इमं मध्वदं वेद आत्मानं जीवमन्तिकात्
ईशानं भूतभव्यस्य न ततो विजुगुप्सते एतद्वै तत्॥

(२) मनसैवेदमाप्तव्यं नेह नानास्ति किंचन ।
मृत्योः स मृत्युं गच्छन्ति य इह नानेव पश्यति ॥

**प्रश्नः – ६ कस्यचिद् एकस्य प्रश्नस्योत्तरं सविस्तरं लेख्यम्** १०x१=१०

(१) यथाग्रन्थं ब्रह्मतत्त्वं स्पष्टयत

(२) कठोपनिषदः चतुर्थवल्ल्याः सारांशः लेख्यः ।

## चतुर्थान्वितिः(Unit - 4)

**प्रश्नः – ७ कश्चिदेकस्य ससन्दर्भं व्याख्या कार्या ।** ५x१=०५

(१) हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम्
यथा च मरणं प्राप्य आत्मा भवति गौतम ॥

(२) यदा पञ्चावतिष्ठन्ते ज्ञानानि मनसा सह ।
बुद्धिश्च न विचेष्टत तामाहुः परमां गतिम् ॥

**प्रश्नः – ८ कस्यचिदेकस्य प्रश्नस्योत्तरं देयम् ।** १०x१=१०

(१) पञ्चमवल्ल्याः सारभागं संगृह्णीत

(२) षष्ठवल्ल्याः सारतत्त्वम् उपपादयत ।

**प्रश्नः – ९ अधोनिर्दिष्टेषु दशप्रश्नानामुत्तराणि लिखत ।** १x१०=१०

(१) नचिकेताः कस्य पुत्रः ?

(२) यमेन नचिकेतसे कति वरं दातुं सङ्कल्पः कृतः ?

(३) प्रथमवल्ल्यां कति मन्त्राः सन्ति ?

(४) धीरः कः मार्गः वृणीते ।

(५) सर्वे वेदाः किं पदमाप्नुवन्ति ?

(६) किं प्रग्रहम् ?

(७) इन्द्रियेभ्यः पराः के ?

(८) तृतीयावल्ल्यां कति मन्त्राः सन्ति ?

(९) सर्वेषु भूतेषु कः न प्रकाशते ?

(१०) कीदृशं परमात्मानं मत्वा धीरः न शोचति ?

(११) का प्राणेन सह सम्भवति ?

(१२) सर्वेषु चेतनेषु सुप्तेषु कः जागर्ति ?

(१३) कः चाक्षुषैः बाह्यदोषैः न लिप्यते ?

(१४) कस्य भयात् अग्निः सूर्यश्च तपति ?

(१५) अङ्गुष्ठमात्रः पुरुषः कुत्र सन्निविष्टः ?

****************